श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयः ॥

## ॥ सप्तमः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ यादवाभ्युदयः ॥

## ॥ सप्तमः सर्गः ॥

व्रजौकसौ विस्मयमन्थराक्षाः
बालार्कवर्णं वसनं वसानम्।
श्यामं युवानं शतपत्रनेत्रं
शैलोदितं देवमथोपसेदुः॥ ७.१ ॥

यमाहुरन्तर्बहिरप्यलक्ष्यं
योगेश्वरं योगिभिरेव दृश्यम्।
तमद्रिशृङ्गे समुदीक्षमाणाः
गोपं सतां गोपगणाः प्रणेमुः॥ ७.२ ॥

स तानशेषान् सुधयेव दृष्ट्या
प्रहर्षयन् प्रत्ययितप्रसादः।
स रामकृष्णान् सनकादिगम्यः
स्वामी सतां स्वागतमन्वयुङ्क्त॥ ७.३ ॥

शरत्प्रवृत्त्येव शशाङ्कभासो
वाचा हरेर्गोपधियः प्रसन्नाः।
मिथो विमर्शैः कुमुदैरिवासन्
मिषद्भिरासादितनिर्मलाशाः॥ ७.४ ॥

विधानदक्षा विपिनाश्रयास्ते
तदन्यसंराधनवीतसङ्गाः।
तमर्चयामासुरदीनसत्त्वाः
संप्रीणनैः शक्रमखोपनीतैः॥ ७.५ ॥

www.prapatti.com

अनन्ययोगादयजन्त चैनं
कृष्णेन तेनैव कृतानुचाराः।
समेघकैलासनिभैरसङ्ख्यैः
सव्यञ्जनैः सादरमन्नकूटैः॥ ७.६ ॥

निर्धारितार्थेषु निजोपदेशान्
न्यस्तोपहारेषु महीधरार्थम्।
अर्च्यत्वमाचार्यकमप्ययासीत्
गोपेषु कृष्णो भुवनेषु गोप्ता॥ ७.७ ॥

उपाहरन्यानि सभाजनार्थं
बलद्विषो वल्लववंशवृद्धाः।
परेण पुंसा परिगृह्यमाणैः
प्राप्तं फलं पुष्पफलादिभिस्तैः॥ ७.८ ॥

मृत्यूपसिक्तैर्भुवनैरशेषैः
अनन्यदत्तैरपि हव्यकव्यैः।
अलब्धपूर्वामभजत्तदानीं
गोपाहृतैः प्रीतिमशेषगोप्ता॥ ७.९ ॥

विधिप्रयुक्ते हविषि प्रभूते
सम्भुज्यमाने हरिणा समक्षम्।
अनागमश्रान्तधियोऽपि तत्र
श्रद्धामविन्दन्त समग्रतोषाः॥ ७.१० ॥

अमृष्यमाणो विहतां स्वपूजां
अक्ष्णां सहस्रेण तदा महेन्द्रः।
अनेहसं रक्तशिलीन्ध्रजालैः
आकालिकैरञ्चितमन्वकार्षीत्॥ ७.११ ॥

अवञ्चितान्यूनपयः प्रदानान्
आराधकान् कालमियन्तमिन्द्रः।



www.prapatti.com

आहारकर्षादभिहन्तुमैच्छत्
कृतानभिज्ञेषु किमानृशंस्यम्॥ ७.१२ ॥

अथाजुहाव प्रतिघानुषङ्गात्
घोराशयो घोषविमर्दकाङ्क्षी।
समेष्यतां सम्भवमर्णवानां
संवर्तकं नाम गणं घनानाम्॥ ७.१३ ॥

प्रदीपितान् कोपहुताशभूम्ना
पीतोदधीन् वारिधरायुधौघान्।
मरुद्भुजेन त्वरितं मरुत्वान्
प्रायुङ्क्त घोषाभिमुखं सघोषान्॥ ७.१४ ॥

प्रकल्पयन्तः परिवेषचक्रं
बृन्दावने विह्वलगोपबृन्दे।
समीरनुन्नाः सहसा पयोदाः
शक्रस्य ते शासनमन्वतिष्ठन्॥ ७.१५ ॥

तटित्सहस्रेण विदीप्तनेत्रः
समेतवज्रो धृतचित्रचापः।
अतर्क्यतेन्द्रः स्वयमभ्रवाहः
कालात्मना भूमिकयेव खेलन्॥ ७.१६ ॥

असूयता वज्रभृता प्रयुक्तां
आकालिकीं प्रावृषमादिदेवः।
आशानिरोधं जगतां दिशन्तीं
निरोद्धुमैच्छन्निजया न शक्त्या॥ ७.१७ ॥

वियत्पयोधिं परितः पयोदैः
वेलातमालैरिव वर्धमानैः।
जिघांसता गोपगणान्मघोना
च्छन्नेन तस्थे मृगयार्थिनेव॥ ७.१८ ॥



www.prapatti.com

अदृश्यरूपः स तदा मरुत्वान्
अम्भोमुचामन्तरतोऽवतस्थे।
अपारयन् द्रष्टुमिव त्रिधाम्नो
दीप्तिं दिवाभीत इवातिसूर्याम्॥ ७.१९ ॥

अमर्षवेगादचमत्क्रियोत्थात्
जिघृक्षता वज्रमकुण्ठवीर्यम्।
अलक्षि जीमूतरथे मघोना
मोघक्रियो मुक्त इवेन्द्रचापः॥ ७.२० ॥

सुतीव्रहुङ्कारभृतो निनादैः
सौदामनीदर्शिततर्जनीकाः।
मरुत्वदाज्ञाविमुखानभीक्ष्णं
निर्भर्त्सयामासुरिवाम्बुवाहाः॥ ७.२१ ॥

क्षणप्रभास्तत्क्षणमन्तरिक्षे
प्रायेण गोपान् ग्रसितुं प्रवृत्ताः।
बभासिरे वासवरोषवह्नेः
ज्वालाग्रजिह्वा इव जातलौल्याः॥ ७.२२ ॥

किमन्तरिक्षेण घनीबभूवे
किमुत्थितं ध्वान्तमहीन्द्रलोकात्।
मूलं किमेतत् प्रलयार्णवानां
इतीव मेने मलिनाभ्रमाला॥ ७.२३ ॥

व्रजोपमर्दं समयो विधास्यन्
बभार नम्रेण पयोदमूर्ध्ना।
महीयसीं वासवचापलेखां
मायाप्रदिष्टामिव माल्यशेषाम्॥ ७.२४ ॥

कठोरगर्जापटहप्रणादः
करप्रसूनैरवकीर्य पृथ्वीम्।



www.prapatti.com

क्षणप्रभाभिर्घटिताङ्गहारः
 कालः प्रतुष्टाव युगान्तनृत्तम्॥ ७.२५ ॥

प्रणुद्यमानाः प्रबलैस्समीरैः
 आप्लावयामासुरमन्दघोषाः।
महीमपर्यायनिपीतमुक्तैः
 औदन्वतैरम्बुभिरम्बुवाहाः॥ ७.२६ ॥

अङ्गाररूक्षस्तनयित्नुपूर्णात्
 ऐरम्मदे तेजसि तप्यमानात्।
विहायसो नूनमभूद्विलीनात्
 विष्वङ्मुखी वृष्टिरवारणीया॥ ७.२७ ॥

प्रदीप्त विद्युद्गणदुर्निरीक्षान्
 सोढुं व्रजाः श्रोत्रविघातिघोषान्।
न शेकुरावर्जितशक्रचापान्
 धाराशरश्रोणिमुचः पयोदान्॥ ७.२८ ॥

सहुङ्कृताः सामिनिमीलिताक्षा
 दीर्घोरुशृङ्गा दरभुग्नवक्त्राः।
प्रत्यग्रहीषुः प्रतिपन्नरोषाः
 धाराः क्षणं धैर्यभृतो महोक्षाः॥ ७.२९ ॥

स्तनाहितस्वस्तिकबाहुबन्धाः
 त्यानालकाः सन्नतवक्त्रपद्माः।
विलग्नदेहा वसनैर्न्यषीदन्
 व्रजस्त्रियो वादितदन्तवीणाः॥ ७.३० ॥

चलद्बलाकोल्बणशङ्खमाला
 पयोधरव्यक्तिधरोर्मिमाला।
प्रावृट् पुनः संववृतेऽतिघोरा
 संवर्तसिन्धोरिव धर्मपत्नी॥ ७.३१ ॥

गम्भीरगर्जापटहप्रणादं
प्रारब्धझञ्झानिलनादगीतम्।
तडिद्भिरापादितताण्डवं तत्
कालस्य सङ्गीतमपूर्वमासीत्॥ ७.३२ ॥

विद्युद्गुणैस्सन्दितया समन्तात्
व्रजे मरुत्वान् मृगयामिवेच्छन्।
समावृणोत् सान्द्र तमिस्रधाम्ना
मेघात्मना वागुरया वनाद्रीन्॥ ७.३३ ॥

आसारधाराच्छुरितेन्द्रचापैः
मेघैर्दिशा माघवती चकाशे।
आमुक्तमुक्तागुणरत्नदामैः
सिन्धोरपत्यैरिव धीरनादैः॥ ७.३४ ॥

हुङ्कारवन्तः स्तनितैरुदारैः
क्षणप्रभाकाञ्चनवेत्रभाजः।
पुरन्दरस्येव पुरस्सरास्ते
प्रचेरुरुत्सारितगोपवर्गाः॥ ७.३५ ॥

प्रकृष्टवज्रायुधचापचिह्नां
पौरस्त्यवातेन कृतप्रकम्पाम्।
कालस्य कृष्णामिव केतुमालां
कादम्बिनीं प्रेक्ष्य जनश्चकम्पे॥ ७.३६ ॥

पयोमुचां पङ्क्तिरसह्यधारा
भूभृद्गणान् भेत्तुमिव प्रवृत्ता।
विडम्बयामास विशेषभीमां
कृतान्तकोपोल्लसितां कृपाणीम्॥ ७.३७ ॥

पयोदभारैर्नमितं नभः किं
शेषाहिना भूमिरुत प्रणुन्ना।

अदूरतस्संपुटभावभाजोः
    आसीत् तयोरन्तरमल्पशेषम्॥ ७.३८ ॥

प्रायः प्रकीर्णाशनिविष्फुलिङ्गैः
    लोकास्तदा लोचनरोधमापुः।
पयोदरूपेण विवर्तमानैः
    पर्जन्यकोपानलधूमजालैः॥ ७.३९ ॥

अलातकल्पाः करकास्त्रिलोकीम्
    आपूरयन्नद्भुतभीमरूपाः।
युगान्तवात्यारभसावधूताः
    सम्भूय तारा इव संपतन्त्यः॥ ७.४० ॥

चकास चञ्चत्करकास्थिमाला
    कादम्बिनीकण्टकभीषणा द्यौः।
वज्रौघनिष्पेषमहाट्टहासा
    मूर्तिस्तदा मोहकरीव रौद्री॥ ७.४१ ॥

शतह्रदाभिर्धृतहेमकक्ष्या
    धाराधराः सेन्द्रधनुष्पताकाः।
अदभ्रघोषध्वनयोऽनुचक्रुः
    सप्तस्रुतां शक्रमतङ्गजानाम्॥ ७.४२ ॥

अहीन्द्रभोगप्रतिमाः पतन्त्यो
    धारास्तदा घोरमरुत्प्रणुन्नाः।
अभावयन्भीमपयोदनक्रं
    व्योमार्णवं वीचिगणावकीर्णम्॥ ७.४३ ॥

आसारदुर्लक्षतडित्प्रकाशं
    अन्योन्य सङ्कीर्णहरिद्विभागम्।
आसीदसह्यस्तनितं प्रजानां
    अभिन्ननक्तंदिवमन्तरिक्षम्॥ ७.४४ ॥

तडित्स्वभावेन तमःप्रकृत्या
    निर्हादरूपेण जलात्मना च।
विवर्तते विश्वमितीव गोपाः
    प्रायो न चिन्तार्णवपारमापुः॥ ७.४५ ॥

प्रवर्तमानान् प्रतिसर्गक्लृप्तौ
    पश्यन् घनान् पाशभृताप्यवार्यान्।
अभीतिमुद्रामधुरेण गोपान्
    आश्वासयामास करेण शौरिः॥ ७.४६ ॥

यदर्चनादापदियं प्रसक्ता
    तेनैव गोपालगणस्य गुप्तिम्।
अरोचयत् कर्तुमशेषगोप्ता
    रामेण संमन्त्र्य रथाङ्गपाणिः॥ ७.४७ ॥

स लीलया मेरुमिव द्वितीयं
    गोवर्धनं गोपकुलप्रदीपः।
नवप्ररूढं निहितैकहस्तो
    नागो नलस्तम्बमिवोज्जहार॥ ७.४८ ॥

अधोमुखावस्थितमेरुकल्पं
    शैलं तमुत्खाय शरण्यगोपः।
उदञ्चयन् सत्वरमूर्ध्वमूलं
    चक्रे महेन्द्रं शमितार्धगर्वम्॥ ७.४९ ॥

फणाभिरामप्रसृताङ्गुलीकः
    प्रियाङ्गरागव्यतिषङ्गपाण्डुः।
भुजस्तदीयो गिरिणा बभासे
    भूमण्डलेनेव भुजङ्गराजः॥ ७.५० ॥

आभुग्नरक्ताङ्गुलिपञ्जरं तत्
    रत्नोर्मिकारश्मिशलाकमन्तः।


www.prapatti.com

नवोदकक्षौमवृतं व्यभासीत्
छत्रप्रकाण्डं हरिबाहुदण्डे॥ ७.५१ ॥

विहारपद्मस्पृहयेव कृष्णो
भुजाद्रिणा भूमिधरं दधानः।
स्वशेषभूतस्य हलायुधस्य
प्राचीमवस्थां प्रथयाम्बभूव॥ ७.५२ ॥

निवासभूते निखिलस्य तस्मिन्
बालाकृतौ बिभ्रति शैलमेकम्।
सविस्मयान्वीक्ष्य जहास गोपान्
संप्रीतिलक्ष्येण तदग्रजन्मा॥ ७.५३ ॥

स कालिकाकालकृपाणिकानां
धाराशतैराहतसन्धिबन्धः।
अवासृजत्क्षिप्रतरं क्षरद्भिः
धातुद्रवैर्नूनमसृञ्जि शैलः॥ ७.५४ ॥

सगैरिकस्तस्य गिरेस्समन्तात्
विलम्बितो वर्षपयः प्रवाहः।
वितानपर्यन्तजुषो वितेने
विडम्बनां वर्णतिरस्करिण्याः॥ ७.५५ ॥

इरंमदार्चिर्व्यतिषङ्गदीप्तः
पाणौ हरेरद्रिपतिश्चकाशे।
प्रत्यस्त्रमिन्द्रेण मुमुक्षितानां
प्रयुक्तमुत्खात इवाशनीनाम्॥ ७.५६ ॥

स बाहुदण्डेन वहन् सलीलं
प्रवालकल्पाङ्गुलिपञ्जरेण।
महीधरच्छत्रमनन्यवाह्यं
मायामयीं व्याकुरुतेव लीलाम्॥ ७.५७ ॥

करालरूक्षाकृतिवर्णभेदान्
कालाग्निनिर्वापणकल्यवृत्तीन्।
रुरोध शैलीकृतया स्वशक्त्या
प्रायो घनान् पर्वतकूटकल्पान्॥ ७.५८ ॥

पृथ्व्या यथावद्धरितं गिरेस्तत्
मूलं निवासाय गवां बभूव।
ग्रासानुभावग्रहणार्हमासीत्
अग्रं च तस्यानतिविप्रकृष्टम्॥ ७.५९ ॥

उदञ्जितस्याद्रिपतेरुपान्ते
पयः प्रवाहा निबिडं पतन्तः।
अतन्वत स्फाटिकवप्रशोभां
अन्तर्गतैरस्तभयैरवेक्ष्याम्॥ ७.६० ॥

अलब्धसूर्येन्दुकरप्रवेशे
मूले गिरेरावसतां जनानाम्।
स्वलोचनद्वन्द्वविहारभेदात्
नक्तन्दिनान्यातनुते स्म नाथः॥ ७.६१ ॥

मुकुन्दगात्रं मणिदर्पणाभं
छायापदेशेन विगाहमानैः।
सगोधनैस्तत्र सुरेन्द्रभीत्या
गोपैस्तदा गूढमिवावतस्थे॥ ७.६२ ॥

बिभर्ति कृष्णः सुकुमारगात्रः
क्षमाधरं तेन विभावयामः।
तदग्रजोऽसौ बिभृयादशेषां
बलं क्षमामित्यवदन्व्रजस्थाः॥ ७.६३ ॥

बभ्रुः स्वशाखाग्रथिताग्रपादैः
तपोधनैस्साकमधः शिरोभिः।



www.prapatti.com

कृताभिमुख्याः कृतिनो मुकुन्दे
तपःप्रवृत्ता इव तत्र वृक्षाः॥ ७.६४ ॥

अधोमुखस्याद्रिपतेस्तृणानि
स्पृष्ट्वा मुकुन्देन निदर्शितानि।
जातस्पृहा जग्रसिरे सहर्षं
गावस्तदा किञ्चिदिवोन्नमन्त्यः॥ ७.६५ ॥

मणिप्रदीपैरतमांसि गोप्यः
प्रविश्य रम्याणि गुहागृहाणि।
अस्पृष्टशीतोष्णमयत्नलब्धं
स्वस्थाशयाः स्वर्गमिवान्वभूवन्॥ ७.६६ ॥

यथापुरं तत्र स पुत्रदारैः
अच्छिन्नगोदोहनमन्थनाद्यैः।
स्वप्नावबोधप्रभृतीनि गोपैः
सिषेविरे विस्मृतपूर्ववासैः॥ ७.६७ ॥

अस्पृष्टधाराजलबिन्दुसेकैः
अकम्पमानैरपदन्तवीणैः।
गोपीजनैरादधिरे विहाराः
गिरीन्द्रमूले गृहनिर्विशेषम्॥ ७.६८ ॥

वनेचरा गोपगणैस्समेता
विमुक्तपर्जन्यभया विचेरुः।
महीधरच्छत्रधरे मुकुन्दे
वन्यानि सत्त्वानि च तत्र गोभिः॥ ७.६९ ॥

प्रभूतधाराप्रतिपन्नशैत्यं
प्राप्तारमद्रिं प्रभुरद्भुतानाम्।
सुदर्शनादप्यधिकामनैषीत्
पवित्रतां पाणिसरोजयोगात्॥ ७.७० ॥

www.prapatti.com

मुकुन्दहस्ताम्बुरुहाधिरोहात्
प्राप्तः श्रियं मेरुमुखैरलभ्याम्।
वर्षापदेशेन गिरिस्स लेभे
नगाधिपत्यार्हमिवाभिषेकम्॥ ७.७१ ॥

मदोल्बणानामिव वल्लवीनां
गीतं गणैः शौरिगुणानुबन्धम्।
गुहाविशेषैर्ध्रुवमन्ववादीत्
गोवर्धनो गोपगणाभिनन्द्यः॥ ७.७२ ॥

कराग्रयन्त्रे घटितेन कृष्णः
सवारिणा सानुमताभिगुप्तान्।
अलम्भयत् गोपगणान् सदारान्
धारागृहाभ्यन्तरवाससौख्यम्॥ ७.७३ ॥

अचिन्त्यशक्तेरकुमारयूनः
कौमारलीलाकवचेन गुप्तम्।
बलं तदाऽग्राङ्गुलिसंश्रिताद्रेः
तावत्परिच्छिन्नमबोधि गोपैः॥ ७.७४ ॥

निमेषनिष्ठ्यूतयुगानि यासां
येभ्यो निरोधव्यसनान्यभूवन्।
तासां स तैः सार्धमभूत्समीक्ष्यः
वामभ्रुवां वल्लवयूथनाथः॥ ७.७५ ॥

कृतार्थभावं भृशमादधाने
कृष्णाङ्गसंस्पर्शविलोकनादौ।
अयन्त्रिताभिश्चिरमाशशंसे
वर्षानुवृत्तिर्व्रजसुन्दरीभिः॥ ७.७६ ॥

धारानिपातैः स्तनतां घनानां
अक्षप्रमाणैरभिहन्यमानः।



www.prapatti.com

आकस्मिकीमन्वभवत् स शैलो
वज्रव्यथां वासवरोषजाताम्॥ ७.७७ ॥

तमेकहस्ताङ्गुलियन्त्रलग्नं
धाराहतं धारयतस्त्रिधाम्नः।
अमुक्तबाल्यस्य समग्रशक्तेः
क्षणार्धवत्सप्त दिनान्यतीयुः॥ ७.७८ ॥

स तादृशांस्तोयभृतो युगान्ते
श्वासानिलैः शोषयितुं क्षमोऽपि।
महेन्द्रदर्पात्ययमात्रकाङ्क्षी
प्रख्यापयामास गिरेः प्रभावम्॥ ७.७९ ॥

एकत्र संरक्षति कृष्णमेघे
गोत्रेण चैकेन गवां कुलानि।
अशेषगोत्रौघभिदा नियुक्तैः
मेघायुतैर्मोघतमैर्बभूवे॥ ७.८० ॥

व्रजोपमर्दे वितथे सुरेन्द्रः
स्वयं वृतोऽपत्रपया भिया च।
दुनोति मां इन्द्रपदं दुरन्तं
किं पौरुषं केवलमित्यदुःख्यत्॥ ७.८१ ॥

निवृत्तरोषे निभृतेऽपि शक्रे
सन्दर्शितस्वामिनिदेशसङ्गाः।
ववर्षुरुग्रां मुहुरश्मवृष्टिं
वैरोपपन्ना इव वारिवाहाः॥ ७.८२ ॥

निवार्य दुर्वारजवान् पयोदान्
नाथं सतां नन्दसुतं प्रपित्सुः।
करम्बितप्रीतिभयः क्षणार्धं
व्यक्तिं भजन् व्योमतलेऽवतस्थे॥ ७.८३ ॥



www.prapatti.com

क्रमेण पृथ्वीमभिगन्तुकामः
    श्वेताभ्रपर्यायगजाधिरूढः।
विलोचनव्यञ्जितपद्मसंपत्
    वर्षात्ययो मूर्त इवाबभासे॥ ७.८४ ॥

पुनः प्रसन्नां पुरुहूतदान्त्या
    पश्यन् दिवं प्राणभृतामधीशः।
तमद्रिमव्याहतदिव्यलीलः
    सन्तोलयामास निवेशयिष्यन्॥ ७.८५ ॥

विलक्षवृत्त्यैव तिरोहितेषु
    मेघेषु विश्रान्तविकत्थनेषु।
स्थाने निवेशादचलीचकार
    च्छत्राचलं शौरिरखिन्नबाहुः॥ ७.८६ ॥

उत्क्षिप्यमाणः परिवर्त्यमानः
    संस्थाप्यमानोऽपि तथैव भूयः।
स तस्य सङ्कल्पवशेन भेजे
    शैलो न शैथिल्यकथाप्रसङ्गम्॥ ७.८७ ॥

व्यपेतशैलव्यवधानदृश्यो
    विभूषितः स्वेदकणैः स बालः।
दिशद्भिरामोदमभौमभोग्यं
    दिव्यैरवाकीर्यत पुष्पवर्षैः॥ ७.८८ ॥

निवेश्य कृष्णं शकटीरथाग्रे
    नाथोपचारैरुपसेदिवांसः।
सगोधनाः स्वं व्रजमाव्रजन्तः
    सङ्गीतलीलामभजन्त गोपाः॥ ७.८९ ॥

कच्चिन्न खिन्नोऽसि वहन् गिरीन्द्रं
    कच्चिन्न विम्लायति पाणिपद्मम्।

इति ब्रुवाणाः सुहृदो मुकुन्दं
पर्याकुलाः पस्पृशुरङ्गमङ्गम्॥ ७.९० ॥

अथावतीर्य स्वयमन्तरिक्षात्
अनुज्झितैरावतदानवर्षात्।
विलक्षचित्तो वसुदेवसूनुं
वल्गुस्मितं वज्रभृदाससाद॥ ७.९१ ॥

पुरोदधानः सुरभिं प्रतीक्ष्यां
आजग्मुषीमात्मभुवो नियोगात्।
अपत्रपागद्गदमाबभाषे
बद्ध्वाञ्जलिं बालमुपेन्द्रमिन्द्रः॥ ७.९२ ॥

नाथ त्वया नर्मविहारभाजा
विमोहितो विप्रतिसारितश्च।
अकिञ्चनस्त्वामहमाश्रितस्सन्
क्षिप्तापकारो न बहिष्क्रियार्हः॥ ७.९३ ॥

कृतापराधेष्वपि सानुकम्पं
क्षेमङ्करं क्षेत्रविवेचकानाम्।
विश्वोपकाराध्वरबद्धदीक्षं
वेद्यं परं वेदविदो विदुस्त्वाम्॥ ७.९४ ॥

निगृह्णतस्ते सृजतश्च वर्षं
निमित्तभावे निहितैस्त्वयैव।
प्रवर्तते निष्प्रतिघो विहारः
स्वयं प्रयुक्तैरिव यन्त्रभेदैः॥ ७.९५ ॥

अनन्यसाधारणपारमेष्ठ्यात्
अन्यानशेषानतिसन्दधानात्।
गोपायितुं पारयति त्रिलोकीं
गोपायमानादपि न त्वदन्यः॥ ७.९६ ॥

www.prapatti.com

व्रजौकसां नाथ दिवौकसां वा
    विपत्प्रसङ्गे विहितावतारः।
एकस्त्वमेव स्वयमीप्सितानां
    दयासहायो नियमेन दाता॥ ७.९७॥

स्वरूपतो विग्रहतश्च विश्वं
    नित्यं त्वयैकेन धृतं यदेतत्।
तदेकदेशोद्वहनादमुष्मात्
    न विस्मयं तत्त्वविदो भजन्ति॥ ७.९८॥

प्रयोजितोऽहं त्वयि भक्तिबन्धात्
    गोभिः स्वलोकादुपसेदुषीभिः।
इच्छामि संरक्षितगोव्रजं त्वां
    स्थाने गवामिन्द्रतयाऽभिषेक्तुम्॥ ७.९९॥

तिरोहितामम्भसि विन्दता गां
    पूर्वं त्वया पोत्रिवरेण लब्धा।
निरुक्तनिष्णातकृताभ्यनुज्ञा
    व्यक्तिं पुनर्यातु शुभा त्वदाख्या॥ ७.१००॥

उपेन्द्रभूताद्भवतोऽपि भूम्ना
    मान्यो मनुष्याभिनये मया त्वम्।
अभ्यर्थनामादरतस्तदेनां
    प्रतीच्छ विश्वम्भर विश्वभूत्यै॥ ७.१०१॥

इति ब्रुवाणो मघवान् धृताद्रेः
    श्रान्तिं जगद्धातुरिवापनेष्यन्।
ध्यातोपयातां त्रिदशप्रणेता
    दिव्यापगां दर्शयति स्म देवीम्॥ ७.१०२॥

अभौमगङ्गापयसा प्रपूर्णां
    आवर्जयन् वारणराजघण्टाम्।

www.prapatti.com

अशेषसाम्राज्यपदाभिषिक्तं
गुप्त्यै गवां गोत्रभिदभ्यषिञ्चत्॥ ७.१०३ ॥

तदङ्गसंस्पर्शवशेन धन्यैः
आप्लाव्यमानामभिषेकतोयैः।
अपेतभारामिव भूतधात्रीं
उल्लाघितां प्रैक्षत नाकनाथः॥ ७.१०४ ॥

कृताभिषेकः कृतिना मघोना
गुप्तेन गोविन्द इति स्वनाम्ना।
कृतप्रसादः प्रजिघाय कृष्णः
स्वर्गाधिरोहाय पुनः सुरेन्द्रम्॥ ७.१०५ ॥

प्रतिगतवति यूथे पुष्कलावर्तकानां
दिवि भुवि च नियत्या दीर्घनिद्रोज्झितानाम्।
गुणगरिमसमृद्धं गोकुलं वीक्ष्य तुष्यन्
गुरुभिरभिनियुक्तामाशिषं प्रत्यगृह्णात्॥ ७.१०६ ॥

मुकुलितरविधाम्ना देहदीप्त्यैव मुष्णन्
जलदकदनजातं जीवलोकस्य जाड्यम्।
व्यचरदचलभोगे चारयन् धेनुचक्रं
पिशुनितनिजमायां भूषयन् पिञ्छमालाम्॥ ७.१०७ ॥

प्रणिहितमधिरोहन् प्रागिवाद्रिं पृथिव्यां
अवमतपुरुहूतैरर्चितो गोपबृन्दैः।
व्रजपतिरुपसीदन् बालयोग्यान् विहारान्
वनचरपरिबर्हो वत्सपालैः सिषेवे॥ ७.१०८ ॥

नाथः सोऽयं शिशुरपि सतां नन्दगोपस्य सूनुः
प्रायः शैलः प्रतिनिधिरसौ पद्मनाभस्य पुंसः।
किं नः साध्यं सुरपतिमुखैः किंपचानैस्तदन्यैः
साकं दारैरिति किल जगुस्तत्र सम्भूय गोपाः॥ ७.१०९ ॥



www.prapatti.com

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
सप्तमः सर्गः ॥

www.prapatti.com